Digitization by eGangotri-South Center

॥ श्रीयोगाम्बिकासमेत-श्रीमातृभूतेश्वर-महाकुंभाभिषेक-महोत्सवपत्रिका ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री सुब्रह्मण्यः

श्री योगाम्बिक



श्रीमातृभूतेश्वरः



श्री गणपतिः

श्री चण्डेश्वरः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ श्रीः ॥

॥ शिवाभ्यां नमः ॥

॥ नमो भगवते श्रीरमणाय ॥

॥ श्रीयोगाम्बिकासमेत-श्रीमातृभूतेश्वर-महाकुंभाभिषेक-महोत्सवपत्रिका ॥

॥ श्रीगणपतिस्तुतिः ॥

निर्यद्दानाम्बुधारापरिमलतरलीभूतरोलम्बपाली
झंकारैः शंकराद्रेः शिखरशतदरीः पूरयन्भूरिघोषैः ।
शार्वः सौवर्णशैलप्रतिमपृथुवपुः सर्वविघ्नापहर्ता
शर्वाण्याः पूर्वसूनुः स भवतु भवतां स्वस्तिदो हस्तिवक्त्रः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ श्रीसद्गुरुस्तुतिः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

सदाशिवसमारंभां भगवत्पादमध्यमाम् ।
रमणाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

अन्तर्यश्च बहिर्विधूततिमिरं ज्योतिर्मयं शाश्वतं
स्थानं प्राप्य विराजते विनमतामज्ञानमुन्मूलयन् ।
पश्यन्विश्वमपीदमुल्लसति यो विश्वस्य पारे पर-
स्तस्मै श्रीरमणाय लोकगुरवे शोकस्य हन्त्रे नमः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ श्री अरुणाचलेश्वरस्तुतिः ॥

ललाटे त्रैपुण्ड्री निटिलकृतकस्तूरितिलकः
स्फुरन्मात्राधारः स्फुरितकटिकौपीनवसनः ।
दधानो धत्तूरं शिरसि फणिराजं शशिकला-
मधीशस्सर्वेषामरुणगिरियोगी विजयते ॥

एकाकारमशेषलोकजनकं हेमाद्रिबाणासनं
नागावासकिरीटकुण्डलधरं नागेन्द्रभूषोज्ज्वलम् ।
राकाचन्द्रसमानकान्तिवदनं राजीवनेत्रार्चितं
शोकारण्यदवानलं शुभकरं शोणाद्रिनाथं भजे ॥

दृष्टो हरति पापानि सेवितो वाञ्छितप्रदः ।
कीर्तितोऽपि जनैर्दूरं शोणाद्रिरिति मुक्तिदः ॥

CC-0. In Public Domain. Uddalore Collection. TN.

Digitization by eGangotri-South Center

अंभोजासनमाधवाप्तदुरहंकारच्छिदग्निज्वल-
ज्ज्वालालीढघराधराकृतिधरं पूर्णेन्दुबिम्बाननम् ।
देव्याऽपीतकुचाम्बया सह लसद्वामाङ्गमङ्गिद्वयी-
पूजातत्परकामितार्थफलदं शोणाचलेशं भजे ॥

करुणापूर्णसुधाब्धे कवलितघनविश्वरूप किरणावल्या ।
अरुणाचल परमात्मन्नरुणो भव चित्तकञ्जसुविकासाय ॥

॥ श्री अपीतकुचाम्बास्तुतिः ॥

कण्ठे विषं विषमुचो भुजगाः कपर्दे
पार्श्वे च भूतपतयः प्रमथाश्च भीमाः ।
शोणाचलेशमुपसृत्य भजेत को वा
न स्यात्तवाम्ब सविधे यदि सन्निधानम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनर्घमणिभूषणामखिललोकरक्षाकरा-
मरालशशिशेखरामसितकुन्तलालङ्कृताम् ।
अखण्डफलदायिनीमरुणशैलमूलालया-
मपीतकुचनायिकामहरहर्नमस्कुर्महे ॥

॥ श्री मातृभूतेश्वरस्तुतिः ॥

मातृत्वं जगदीश्वरत्वमुभयं वेदेषु यत्ते श्रुतं
तेन त्वं भुवि विश्रुतोऽसि भगवन् श्रीमातृभूतेश्वरः ।
तत्त्वं शक्त्यविनाकृतत्वमिति ते सर्वान्समुद्बोधितुं
योगाम्बाऽपि विराजते भगवती त्वद्वामपार्श्वे सदा ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

माता श्रीरमणस्य या भगवतः सौन्दर्यनाम्नी सती
तद्धस्ताम्बुजदीक्षया गतमला ब्रह्मात्मतामीयुषी ।
शैवं रूपमवाप्य शक्तिकलितं देवालये साऽधुना
योगाम्बासमलङ्कृतो विजयते श्रीमान्भूतेश्वरः ॥

अखण्डपरिपूर्णसच्चिदानन्दस्वरूपो मायावच्छिन्नो मायानियन्ताऽशरीरी नित्यशुद्धबुद्धमुक्तस्वभावः श्रुतिस्मृत्यादिभिर्जगत्कारणत्वेन प्रतिपादितः सर्वेश्वरः परमात्मा स्वस्वरूपं सुखेन साक्षात्कृत्य, भक्तिपूर्वकं समुपास्य, भोगमोक्षौ सम्पाद्य च, स्वं जन्म सर्वेऽपि जन्तवो यथा कृतार्थीकुर्युस्तथा स्वमायया पराशक्ति-सहितोमामहेश्वरादि दिव्यमङ्गलविग्रहं गृहीत्वा भुवि देवतायतनेष्वधिष्ठाय संप्रकाशत इति श्रुतिस्मृतीतिहासपुराणाद्यनुगृहीतं शिष्टपरिगृहीतं च । तादृशसाम्बशिवाधिष्ठित-देवालयशोभितानि पुण्यक्षेत्राणि भारतक्षेत्रेऽसंख्येयानि विद्यन्ते । तेष्वष्टषष्टिसंख्या-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कानि क्षेत्राणि मुख्यानि भवन्ति । तत्रापि मुख्यतराणि चत्वारि कथ्यन्ते । तानि च चिदम्बरक्षेत्रं, कमलालयक्षेत्रं, काशीक्षेत्रं, अरुणाचलक्षेत्रमिति । उक्तं च,

"दर्शनादभ्रसदसि जननात्कमलालये ।
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले ॥"

इति । चतुर्ष्वप्येतेषु त्रीण्याद्यानि क्षेत्राणि प्रयत्नसापेक्षमुक्तिप्रदानि विराजन्ते । चतुर्थमरुणाचलक्षेत्रं तु प्रयत्ननिरपेक्षं यदा कदा वा, यत्र कुत्र वा, येन केनापि यथाकथंचित्स्वस्मृतिमात्रेण मुक्तिप्रदमिति मुख्यतममिदं क्षेत्रम् । पुराऽरुणाचलेश्वरोऽयं विश्वाधिकत्वे विप्रतिपन्नाभ्यां दुरहंकारान्विताभ्यां विधिविष्णुभ्यामन्विष्याप्यदृष्टशिरःपादप्रदेशेन दशदिगन्तरव्यापकदिव्यज्योतिःस्तंभात्मनाऽऽविर्बभूव । ततस्तज्ज्योतिस्वरूपनिर्णयाशक्तयोर्गलितगर्वयोः शरणागतयोस्तयोर्दयासागरोऽयमरुणाचलेश्वरः स्वस्वरूपविषयभ्रमसंशयादिकं कृपया व्यपोह्य, तदीयसविनयप्रार्थनया,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वलोकसुलभदर्शनानुग्रहेच्छया च तज्ज्योतिःस्तंभस्वरूपमुपसंहृत्य ज्योतिर्मयस्वयंभु-
लिंगात्मना स्थितः) तथा च स्कान्दे—

"पुरा ब्रह्मा च विष्णुश्च शिवतेजोंशसंभवौ ।
साहंकारौ युयुधतुः परस्परजिगीषया ॥

तदा तयोर्गर्वशान्त्यै योगिध्येयस्सदाशिवः ।
अग्नितेजोमयं रूपमादिमध्यान्तवर्जितम् ॥

सम्प्राप्य तस्थौ तन्मध्ये दिशो दश विभासयन् ।
.....
तत्प्रार्थितश्च देवेशो यातः स्थावरलिङ्गताम् ।
अरुणाद्रिरिति ख्यातः प्रशान्तस्संप्रकाशते" ॥ इति ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा शिवपुराणेऽप्यरुणाचलमधिकृत्य—

"यदिदं निष्कलं स्तंभं मम ब्रह्मत्वबोधकम् ।
लिङ्गलक्षणयुक्तत्वान्मम लिङ्गं भवेदिदम् ॥ इति ॥

किञ्चायं लिङ्गाकारोऽचलः कृतयुगेऽनलाचलत्वेन, त्रेतायुगे माणिक्यमहीधरत्वेन, द्वापरयुगे हेमाद्रित्वेन, कलियुगे उपलपर्वतत्वेन च नानारूपो विभाति । सर्वलोकोत्तरः कैलासाचलोऽपि परमेश्वरस्यैकः स्थानविशेष एव । न तु तस्य विग्रहभूतः । अरुणाचलस्तु परमेश्वरस्य स्थानविग्रहोभयरूपेण प्रकाशते । नित्यनैमित्तिकाराधनसौलभ्यार्थं स्वयंभुलिंगात्मनाऽस्याचलस्योपत्यकायां, उत्तरभागगतशृंगे कस्यचिद्वटविटपिनो मूलदेशे सिद्धपुरुषरूपेण चाविर्भूयानुगृह्णाति नः । कल्पान्तकालेऽप्यविनश्वरस्वभावोऽयमचलो व्यापकशुद्धशिवस्वरूप एव ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यो जनत्रयीपारणाहे, शिवलिङ्गमयत्वेन भक्तैर्ज्ञायमानेऽस्मिन्क्षेत्रे निवासमात्रेण जनां वन्धमोचकत्वाभिमतदीक्षादिनियमक्लेशमन्तरैव शिवसायुज्यं सिध्येदिति परमेश्वरस्य शासनम् । अत्र क्षेत्रे बहुभिर्मूर्तिविशेषैस्सह षष्टयुत्तरत्रिशतगणितानि पुण्यतीर्थानि परितः प्रकाशन्ते ।

कैलासे पुरा परमेश्वरनेत्रपिधानापराधापनयनाय उमादेवी श्रीकाञ्चीमभ्येत्य श्रीमदेकाम्रेश्वरं सकतलिङ्गे यथावत्संपूज्य, तदाज्ञयात्रारुणाचल एव दुश्चरं महत्तपो विधाय च परमेश्वराविनाभावरूपं तद्वामभागमवाप ।

एवमिन्द्रादयो देवाः, गौतमादयो महर्षयः, वज्राङ्गदपाण्ड्य-प्रतर्दन-वल्लालादयो भूपालाः, मृगपक्षिपश्वादयश्चारुणाचलेश्वरानुग्रहेण स्वस्वाभीष्टमवापुः । स्मृतिमात्रेणातिदूरस्थानपि जनाननुगृह्णाति ह्ययमचलः । एवं सति, कार्तिकमासि दीपोत्सवमस्य दृष्टवतः, गिरिप्रदक्षिणं विधायिनश्च मोहान्धकारनिरासपूर्वकं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विज्ञानमहाप्रकाशदानेनायमनुगृह्णातीत्यत्र किमु वक्तव्यम् । 'असौ यस्ताम्रो अरुण उत बभ्रुस्सुमङ्गलः' 'नमस्ताम्राय चारुणाय च' इति श्रीरुद्रानुवाके महीकृतोऽयमेवारुणाचलः । शैववैष्णवशाक्तादिसमयिनश्च स्वस्वदेवतात्वेनामुं स्तुवन्ति । किंचाद्यैः श्रीशङ्करभगवत्पादाचार्यैः ज्ञानसम्बन्ध-वागीश-सुन्दर-व्रातपुरीश्वरादिसमयाचार्यैश्च भक्तिरसामृततरङ्गिताभिः संस्कृतद्राविडसूक्तिभिरभिगीतोऽयमरुणाचलः ।

एवं प्रथितमहिमा सर्वप्राण्याकर्षणायःकान्तगिरिनिभोऽयमरुणाचलः, पाण्ड्यदेशविराजमानशिवक्षेत्रहारतरलायमाने श्रीसैहायवल्ल्यम्बिकासमेतश्रीभूमिनाथेश्वरालयालङ्कृते श्रीमदावर्ताख्यपुण्यक्षेत्रे संभूतं, श्रीद्वादशान्तमहास्थले क्रमशोऽभिवृद्धं, किञ्चिदूनसप्तदशवयस्कं वेङ्कटरमणाख्यं कुमारं स्वकरुणाशक्तिपातेनाविश्य, स्वस्मृतिं तस्य समुत्पाद्य, स्वयं तदन्तः प्रविश्य, तज्जीवचेष्टां निरुद्ध्य, स्वपदैकाभिमुखीकृत्य, स्वमिव तमप्यचलीकृत्य, समृद्धया स्वहृदयदयया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिन्मात्रं स्वपदं तस्मै वितीर्य सहजस्वात्मनिष्ठतां समापाद्य, दक्षिणामूर्तिमिव दिव्यज्ञानमूर्तिं विधाय, 'भगवान् श्रीरमणमहर्षि' रिति सुप्रसिद्धदिव्यनामधेयं स्वस्थान एव स्थित्वा जिज्ञासुलोकमखिलं मौनतपसा स्वनिकटमाकृष्य मौनोपदेशेनानुग्रहीतुं महात्मानमर्पयामासेति महाभाग्यमिदं न स्सर्वेषाम् ।

शरणागतजनताया अखण्डब्रह्मज्ञानोपदेशनावाऽनादिसंसारसागरात् निरतिशयानन्दपरपारप्रापणनिपुणस्य, निस्समाभ्यधिकदेवतारूपस्य महात्मनः श्रीरमणभगवतो जननीत्वभाग्यवत्याः सौन्दर्याम्बाभिख्यायाः, स्वसुते सुतभावं विहाय गुरुभावमुद्वह्य शरणं प्रपन्नायाः, चरमेऽपि वयसि भगवद्भक्तकैङ्कर्यतत्परायाः, ज्ञानदेशिक - श्रीरमणभगवद्धस्तदीक्षाप्रभावेन स्वस्वरूपं साक्षात्कृत्य प्रपञ्चोपशमं कैवल्यं प्राप्नायाः, देवालयाधिष्ठिताया दिव्यस्थानमेव श्रीमान् प्रतिश्वरसन्निधीभूय सर्वाननुगृह्णाति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवमाविर्भूतस्य श्रीयोगाम्बिकासमेतश्रीमातृभूतेश्वरस्य गर्भगृह-मुखमण्टप-महामण्टप-विमान-गोपुर-प्राकारादिपरिष्कृतमायतनं, तत्प्राकारे गणपति-सुब्रह्मण्य-दक्षिणामूर्ति-चण्डिकेश्वरादि-देवतास्थानानि च निर्माय भाविनि [illegible] वत्सरे मीनमासे चतुर्थे दिने (१७-३-४९) कृष्णपक्षतृतीयायां गुरुवासरे चित्रा-नक्षत्रयुते मिथुने शुभंयुलग्ने शुभयोगादियुक्ते शुभदिने, प्राकारे गणेशादिपरिवार-देवताप्रतिष्ठया मूलस्थाने मेरुप्रस्तारात्मकश्रीचक्रराजप्रतिष्ठया च सह (श्रीयोगा-म्बिकासमेत-श्रीमातृ-भूतेश्वरस्य) महाशान्तिरूपमहाकुंभाभिषेकः कर्तव्य इति सद्गुरोर्भगवतः श्रीमहर्षेः करुणामवलम्ब्य निर्णीतः। सर्वेऽपि भक्ताः सादरमा-गत्य महोत्सवमेनमवलोक्य जन्मसाफल्यमधिगच्छेयुरिति प्रार्थ्यन्ते।

॥ शुभमस्तु ॥

श्रीरमणाश्रमम्
अरुणाचलः

निरञ्जनानन्दस्वामी
(सर्वाधिकारी)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ श्री: ॥

॥ श्रीयोगाम्बिकासमेत-श्रीमान्भूतेश्वरस्य महाकुंभाभिषेकमहोत्सव-कार्यक्रमसूचिका ॥

वत्सरादिः	ईशपुत्रशक मास दिनाः	वासरः	कालः	घटिकाः (नालिकाः)	घण्टाः	कार्यक्रमविवृतिः
सर्वधारि सं. मीन मा १	१४-३-४९	सोमवा.	रात्रिः	३४-३०—३९-१५ (तुलालग्ने)	८—१०	अनुज्ञा, विघ्नेश्वरपूजा, वास्तुशान्तिः, आचार्यभोजनं-वरणम् ।
				५०-५५ (मकरलग्ने)	२-१५—४-१५	कलाकर्षणं, घटस्थापनम् ।
,, ,, २	१५-३-४९	भौमवा.	प्रातः	२-३०—११-१५	७—१०-१५	यागपूजा ।
			सायं	२७-३०—३५	५—८	यागपूजा ।
,, ,, ३	१६-३-४९	बुधवा.	प्रातः	२-३०—११-१५	७-१२—१५	यागपूजा ।
			सायं	२७-३०—३५	५—८	यागपूजा ।
,, ,, ४	१७-३-४९	गुरुवा.	प्रातः	सूर्यो. प्राक् ५७-३०—१२-४५	५—१२	यागपूजा, स्पर्शाहुतिः, महापूर्णाहुतिः,
				१२-४५-१७ मिथुनलग्ने	११—१२-१५	महाकुंभाभिषेकः ।
			सायं	२७-३०—३५	५—८	महाभिषेकः ।

CC-0. In Public Domain. Cuddalore Collection. TN.